PG/2ND SEM/SAN/19

**2019**

**M.A.**

**2nd Semester Examination**

# SANSKRIT

**Paper : SAN-202**

Full Marks : 40

Time : 2 Hours

*The figures in the margin indicate full marks.*
*Candidates are required to give their answers in their own words as far as practicable.*
*Illustrate the answers wherever necessary.*

सर्वे प्रश्नाः संस्कृतेनैव समाधेयाः।

1. (क) प्रश्नद्वयं समाधेयम् — 2×2=4

(i) उपधा का? उदाहरणं दीयताम्।

(ii) 'ङ्याप्प्रातिपदिकात्' - सूत्रे ङ्याब्ग्रहणं किमर्थम्?

(iii) 'समासग्रहणं नियमार्थम्' - इत्यत्र नियमपदेन किं परामृश्यते?

(iv) अपृक्तमित्यनेन किं बोध्यते?

*[ Turn Over ]*

(ख) प्रश्नद्वयं समाधेयम् — 2×2=4

(i) हर्य्यनुभवः इत्यत्र यकारस्य द्वित्वं कथं भवति?

(ii) गव्यूतिः इत्यस्य कोऽर्थः?

(iii) गो + अग्रम् इत्यत्र सन्धिकार्ये किं किं रूपं प्राप्यते?

(iv) प्रौढ़ः इत्यस्य सन्धिः विच्छिद्यताम्। अत्र केन सूत्रेण सन्धिर्जातः?

2. (क) प्रश्नद्वयं समाधेयम् — 2×4=8

(i) रामाः-इत्यस्य ससूत्रं साधनप्रक्रिया प्रदर्श्यताम्।

(ii) हरेः-इत्यस्य ससूत्रं साधनप्रक्रिया प्रदर्श्यताम्।

(iii) 'शेषो घ्यसखि' - इति सूत्रं सप्रसङ्गं व्याख्यायताम्?

(iv) अव्युत्पन्नवादिनां मते प्रातिपदिकसंज्ञा केषां भवति? ससूत्रमालोच्यताम्।

(ख) प्रश्नद्वयं समाधेयम् 2×4=8

(i) 'एचोऽयवायावः' - इत्यस्य कः आशयः प्रत्येकमुदाहरणं दीयताम्।

(ii) सुद्ध्युपास्यः' – इत्यस्य सन्धिप्रकारः ससूत्रं प्रदर्श्यताम्।

(iii) 'वृद्धिरेचि – सूत्रस्य व्याख्या क्रियताम्?

(iv) 'हर इह' इति कथं सिध्यति? अत्र गुणकार्यं भवेत् न वा?

3. यथानिर्देशमुत्तरं देयम् — 2×8=16

(क) अङ्गसंज्ञाविधायके सूत्रे विधिपदस्योपादाने किं तात्पर्यम्। सोदाहरणं स्पष्टीक्रियताम्।

अथवा

'सन्निपातलक्षणो विधिरनिमित्तं तद्विघातस्य' – इति वचनस्याशयः सोदाहरणं स्पष्टीक्रियताम्।

(ख) प्लुतप्रगृह्ये अधिकृत्य सोदाहरणं प्रकृतिभावस्थलानि प्रदर्श्यन्ताम्।

अथवा

"पुरस्तादपवादन्यायेनेयं वृद्धिः 'एङि पररूपम्' इत्यस्यैव बाधिका, न तु 'ओमाङोश्च' इत्यस्य" – वचनस्यास्याशयः स्पष्टीक्रियताम्।

---